# PS/UM-I/2/76/19

## द्वितीयपत्रम्

## साहित्यम्

**समयः घण्टात्रयम्** **पूर्णाङ्काः 100**

**अ. सर्वे प्रश्नाः समाधेयाः।** **(20×2=40)**

1. रघुवंशमहाकाव्यं केन लिखितम्?
2. रघुवंशस्य मङ्गलपद्यं लिखत।
3. 'क्व सूयप्रभवो वंशः. . . . .' इत्यस्मिन् पद्ये कविः कयोः मध्ये महदन्तरं सूचयति?

**अथवा**

रघुवंशीयाः कथं कर्म कुर्वन्ति?

4. रघुवंशवर्णने कविः कैः प्रचोदितः?
5. रघुवंशीयाः वार्धके कां वृत्तिं स्वीकुर्वन्ति?
6. मनीषिणां माननीयः कः?
7. राजेन्दुः कः?
8. यादोरत्नैः अर्णवः कीदृशः भवति?

**अथवा**

दिलीपस्य सेना कीदृशी आसीत्?

9. दिलीपस्य गुणाः कथम् आसन्?



Scanned by CamScanner

10. दिलीपस्य पत्नी का?

11. अथर्वनिधिः कः?

12. 'शिष्यः शासितुरानतः' – अत्र शिष्यःकः? कश्च शासिता?

**अथवा**

पीतप्रतिबद्धवत्सा का?

13. मनोः प्रसूतिः केन रक्षिता?

14. वने दिलीपस्य वेषभूषा कथमासीत्?

15. मरुत्सखः कः?

**अथवा**

नन्दिनी दिगन्तराणि कीदृशानि कृतवती?

16. मध्यमलोकपालः कः? अस्य शब्दस्य कोऽर्थः?

17. 'उभावलञ्चक्रतुः' – अत्र उभौ कौ?

18. दिलीपः नन्दिन्याः पूजां कति दिनानि कृतवान्?

19. नन्दिनी दिलीपं परीक्षितुं किम् अकरोत्?

20. 'अधित्यका' इत्यस्य कोऽर्थः?

**अथवा**

'मदीयं क्षीरमुपभुङ्क्ष्व' इति का उक्तवती? कं प्रति उक्तवती?



Scanned by CamScanner

**ब. सर्वे प्रश्नाः समाधेयाः।** **(5×8=40)**

21. वैवस्वतमनुं वर्णयत।

22. प्रजां प्रति दिलीप एव पिता आसीत् – विवृणुत।

23. वसिष्ठाश्रमस्थान् मृगान् तेषां रोमन्थं च वर्णयत।

**अथवा**

दिलीपः स्वकीयं अनपत्यतादुःखं कस्मै निवेदितवान्? कथं च निवेदितवान्?

24. 'अथ प्रजानाम् अधिपः प्रभाते. . . . .' इत्यदिपद्यं व्याख्यात।

**अथवा**

सिंहः दिलीपाय देहरक्षणस्यावश्यकतां कथं निवेदयति? विवृणुत।

25. स्वदेहार्पणेन नन्दिन्याः विमोचनमेव ज्यायः इति दिलीपः कथं समर्थयति?

**अथवा**

नन्दिनी दिलीपं कथम् अनुगृहीतवती? विवृणुत।

**स. निबन्धात्मकः प्रश्नः समाधेयः।** **(1×20=20)**

26. वसिष्ठाश्रमं वर्णयत।

**अथवा**

नन्दिनी कथं सेवितव्या इति वसिष्ठमहर्षिः दिलीपमुक्तवान्?

**अथवा**

द्वितीयसर्गस्य सारं संक्षेपेण लिखत।



Scanned by CamScanner